Std : $9^{th}$ EM | **Home Revise** | Date :

Sub : Sanskrit (Full) | Marks : 30 marks

## प्रथमः विभागः – सुगमसंस्कृतम् (०७)

**१) अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** (२)







१) ............. २) .............. ३)...............

४)................. ५) ...........

**आ) सङ्ख्याः अक्षरैः / अङ्कैः लिखत । (३ तः २)** (१)

| • अङ्काः | • अक्षराणि |
|---|---|
| • ४४ | • ......... |
| • ......... | • सप्तविंशतिः |
| • ३४ | • ........ |

**इ) समयम अक्षरैः लिखत पठत च ।** (२)


१) सौरभः देवालयं (४:५०) वादने गच्छति ।

२) सः कक्षां (७: १०) वादने प्रविशति ।

३) मध्यान्हे (१२:३०) वादने गृहम् आगच्छति ।

४) रात्रौ सः (१०:१५) वादने स्वपिति ।


**ई) वासर-तालिका पूरयत।** (२)




## द्वितीयः विभागः – गद्यम् । (१५)

**I) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।**

**क) गद्यांश समानार्थकं शब्दं चित्वा रेखाचित्रं पूरयत।** (२)




देवदत्तः नाम कोऽपि धनिकः आसीत् । एकदा तस्य धनस्यूतः लुप्तः । तस्य गृहे षड् भृत्याः आसन् । तेषु एव एकः चौरः स्यात्, इति तस्य मतम् । चौरं ग्रहीतुं सः वीरबलं साहाय्यम् अयाचत । वीरबलः अवदत्, “मित्र! अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय” इति ।

यथानिश्चितं सर्वे सेवकाः वीरबलस्य गृहम् आगताः । वीरबलेन पूर्वमेव सर्वेषां कृते समानोन्नतयः यष्टिकाः आनीताः । सः सेवकान् अवदत्, “भोः पश्यन्तु एताः मायायष्टिकाः । तासु एकां यष्टिकां स्वीकृत्यः सर्वैः देवदत्तस्य गृहं गन्तव्यं,श्वः प्रभाते पुनरागन्तव्यम् । येन केनापि धनस्यूतः चोरितः स्यात् तस्य यष्टिका अङ्गुलिमात्रः दीर्घा भविष्यति ।”

**ख) पूर्णवाक्येन उत्तरं लिखत ।** (२)

1. कस्य धनस्यूतः लुप्तः ?
2. ‘तेषु एव एकः चौरः स्यात्’ इति कस्य मतम् ।

**ग) कः कं वदति ?** **(१)**

१. “भोः पश्यन्तु, एताः मायायष्टिका” ।

२. “मित्र! अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय” इति ।

**घ) सूचनानुसारं कृतीः कुरूत ।** **(२)**

१. बालकः पुस्तकं <u>पठति</u> पाठशालां गच्छति च। (पूर्वकालवाचक त्वान्त अव्यय लिखत।)

२. बालकाः गृहम् आगच्छन् जलं च <u>अपिबन्</u>। (हेत्वर्थक तुमन्त अव्यय लिखत ।)

**५) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।**

**क) एकवाक्येन उत्तरत ।** **(२)**

१) कुत्र विश्रामं कर्तुं रघुः कौत्साय अकथयत्?

२) दिग्विजयानन्तरं रघुः किम् अकरोत् ?

> तदा तं परीक्षितुं वरतन्तुः कथयत् – “त्वया मम सकाशात् चतुर्दशविद्याः अधीताः । अतः चतुर्दशकोटिसुवर्णमुद्राः आनयः ।” गुरो वचनं श्रुत्वा कौत्सः चिन्ताकुलः जातः । ‘एतवतीः सुवर्णमुद्राः कुतः आनयानि ? महाराजं रघुं विहाय न कोऽपि एतावतीः मुद्राः दातुं समर्थः । अतः ‘रघुं प्रति गच्छामि’ इति विचार्य कौत्सः रघोः समीपम् अगच्छत् । दिग्विजयानन्तरं रघुः ‘विश्वजित्’ नाम्नि यज्ञे अशेषं धनं दानरूपेण अयच्छत् । रिक्तहस्तं रघुं दृष्ट्वा कौत्सः निवृत्तः । रघुः तम् आहूय आगमनस्य प्रयोजनम् अपृच्छत् । तदा कौत्सः अवदत् “रघो, अहं गुरूदक्षिणार्थं चतुर्दशकोटिसुवर्णमुद्राः गुरवे दातुमिच्छामि । किन्तु भवान् पूर्वमेव सर्वस्वदानम् अकरोत् । अतः अहम् अन्यत्र गच्छामि ।” रघुः अवदत्, “हे कौत्स, तिष्ठ । मम यज्ञशालायां विश्रामं कुरू । अहं निश्चयेन तव साहाय्यं करोमि।”

**ख) कः कं वदति ।** **(१)**

१) “अतः चतुर्दशकोटिसुवर्णमुद्राः आनय।”

२) “रघुं प्रति गच्छामि।”

**ग) समूहेतरपदं चिनुत ।** **(१)**

१) यज्ञः, क्रतुः, सप्ततन्तुः, वरतन्तुः

२) गुरवे, वरतन्तवे, कौत्साय, रघवे

**घ) प्रश्ननिर्माणं कुरूत ।** **(१)**

१) <u>**कौत्सं**</u> परीक्षितुं वरतन्तुः अकथयत् ।

२) <u>**गुरोः**</u> वचनं श्रुत्वा कौत्सः चिन्ताकुलः जातः ।


**ङ) शब्दस्य वर्णविग्रहं कुरूत । (४ तः ३)** **(३)**

१) गुरूभक्त्या २) आक्रान्तुम् ३) निःस्पृहः ४) सङ्कल्पम्

## तृतीयः विभागः – पद्यम् । (०८)

**२) अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।**

क) जालरेखाचित्रं पूरयत। **(२)**



स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ।।
श्रोतुं कर्णौ, वक्तुमास्यं सुहास्यं घ्रातुं घ्राणं पादयुग्मं विहर्तुम् ।
द्रष्टुं नेत्रे हस्तयुग्मं च दातुं, ध्यातुं चित्तं येन सृष्टं स पातु ।।

ख) पूर्णवाक्येन उत्तरं लिखत । (२)

१. ईश्वरेण श्रोतुं किं दत्तम् ?
२. ईश्वरेण विहर्तुं किं दत्तम् ?

**ग) श्लाकौ शुध्दौ पूर्णौ च लिखत । (३ तः २) (४)**

१. गुणाः कुर्वन्ति.................. षट्पदाः।।
२. भुक्त्वा तृणानि ...................लोकमातरः।।

.....।। **शुभं भवतु** ।।......